# Dhanvantaristotra

# ધન્વન્તરિસ્તોત્રમ્

## Document Information

Text title : dhanvantarIstotram

File name : dhanvantarIstotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Transliterated by : Usha Rani Sanka usharani.sanka at gmail.com

Proofread by : Usha Rani Sanka, Avinash Sathaye, PSA Easwaran

Description-comments : Audio http://www.divinebrahmanda.com/2012/09/sri-dhanwantri-stotram-by-sri.html

Latest update : June 8, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 14, 2023

*sanskritdocuments.org*

# ધન્વન્તરિસ્તોત્રમ્

ૐ નમો ભગવતે ધન્વન્તરયે અમૃતકલશહસ્તાય,
સર્વામયવિનાશનાય, ત્રૈલોક્યનાથાય શ્રીમહાવિષ્ણવે નમઃ ॥

ચન્દ્રૌઘકાન્તિમમૃતોરુકરૈર્જગન્તિ
સઞ્જીવયન્તમમિતાત્મસુખં પરેશમ્ ।
જ્ઞાનં સુધાકલશમેવ ચ સન્દધાનં
શીતાંશુમણ્ડલગતં સ્મરતાત્મસંસ્થમ્ ॥

મૂર્ધ્નિ સ્થિતાદમુત એવ સુધાં સ્રવન્તીં
ભ્રૂમધ્યગાચ્ચ તત એવ ચ તાનુસંસ્થાત્ ।
હાર્દાચ્ચ નાભિસદનાદધરસ્થિતાચ્ચ
ધ્યાત્વાભિપૂરિતતનુઃ દુરિતં નિહન્યાત્ ॥

અજ્ઞાન-દુઃખ-ભય-રોગ-મહાવિષાણિ
યોગોઽયમાશુ વિનિહન્તિ સુખં ચ દદ્યાત્ ।
ઉન્માદ-વિભ્રમહરઃ હરતશ્ચ સાન્દ્ર-
માનન્દમેવ પદમાપયતિ સ્મ નિત્યમ્ ॥

ધ્યાત્વૈવ હસ્તતલગં સ્વમૃતં સ્રવન્તં
એવં સ યસ્ય શિરસિ સ્વકરં નિધાય ।
આવર્તયેન્મનુમિમં સ ચ વીતરોગઃ
પાપાદપૈતિ મનસા યદિ ભક્તિનમ્રઃ ॥

ધં ધન્વન્તરયે નમઃ ॥

ધં ધન્વન્તરયે નમઃ ॥

ધં ધન્વન્તરયે નમઃ ॥

દીર્ઘ-પીવર-દોર્દણ્ડઃ, કમ્બુગ્રીવોઽરુણેક્ષણઃ ।
શ્યામલસ્તરુણઃ સ્રગ્વી સર્વાભરણભૂષિતઃ ॥

પીતવાસા મહોરસ્કઃ, સુમૃષ્ટમણિકુણ્ડલઃ ।
નીલકુઞ્ચિતકેશાન્તઃ, સુભગઃ સિંહવિક્રમઃ ॥
var સ્નિગ્ધકુઞ્ચિત Bhagavatam 8.8.34

અમૃતસ્ય પૂર્ણકલશં બિભ્રદ્વલયભૂષિતઃ।
સ વૈ ભગવતઃ સાક્ષાદ્ વિષ્ણોરંશાંશસમ્ભવઃ ।
ધન્વન્તરિરિતિ ખ્યાતઃ આયુર્વેદદૃગિત્યભાક્ ।
એવં ધન્વન્તરિં ધ્યાયેત્ સાધકોऽભીષ્ટસિદ્ધયે ॥

ૐ નમો ભગવતે ધન્વન્તરયે અમૃતકલશહસ્તાય,
સર્વામયવિનાશનાય, ત્રૈલોક્યનાથાય શ્રીમહાવિષ્ણવે નમઃ ॥

ધન્વન્તરિઙ્ગરુચિધન્વન્તરેરિતરુધન્વંસ્તરીભવસુધા
ધાન્વન્તરાવસથમન્વન્તરાધિકૃતધન્વન્તરૌષધનિધે ।
ધન્વન્તરંગશુગુધન્વન્તમાયિષુ વિતન્વન્ મમાબ્ધિતનય
સૂન્વન્તતાત્મકૃતતન્વન્તરાવયવતન્વન્તરાર્તિજલધૌ ॥

ધન્વન્તરિશ્ચ ભગવાન્ સ્વયમાસ દેવો var સ્વયેમેવ કીર્તિઃ
નામ્ના નૃણાં પુરુરુજાં રુજ આશુ હન્તિ ।
યજ્ઞે ચ ભાગમમૃતાયુરવાપ ચાર્ધા var રવાવરુન્ધ
આયુષ્યવેદમનુશાસ્ત્યવતીર્ય લોકે ॥

Bhagavatam 2.7.21

ક્ષીરોદમથનોદ્ભૂતં દિવ્યગન્ધાનુલેપિનમ્ ।
સુધાકલશહસ્તં તં વન્દે ધન્વન્તરિં હરિમ્ ॥

શરીરે જર્જરીભૂતે વ્યાધિગ્રસ્તે કલેવરે ।
ઔષધં જાહ્નવીતોયં વૈદ્યો નારાયણો હરિઃ ॥

અયં મે હસ્તો ભગવાન્ અયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોऽયં શિવાભિમર્ષણઃ ॥

અચ્યુતાનન્ત-ગોવિન્દ-વિષ્ણો નારાયણામૃત ।
રોગાન્મે નાશયાશેષાન્ આશુ ધન્વન્તરે હરે ॥

ધં ધન્વન્તરયે નમઃ ॥

ધં ધન્વન્તરયે નમઃ ॥

ધં ધન્વન્તરયે નમઃ ॥

ૐ નમો ભગવતે ધન્વન્તરયે અમૃતકલશહસ્તાય,
સર્વામયવિનાશનાય, ત્રૈલોક્યનાથાય શ્રીમહાવિષ્ણવે નમઃ ॥

ઇતિ ધન્વન્તરિસ્તોત્રં સમ્પૂર્ણમ્ ।

Audio http://www.divinebrahmanda.com/2012/09/sri-dhanwantri-stotram-by-sritml
Encoded and proofread by Usha Rani Sanka usharani.sanka at gmail.com
Proofread by Avinash Sathaye sohum at ms.uky.edu and
PSA EASWARAN

*Dhanvantaristotra*
pdf was typeset on November 14, 2023

Please send corrections to *sanskrit@cheerful.com*